त्रिनयनां नीलाम्बरधरां पराम् । नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम् । एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य ध्येयस्वरूपं यथा "वकारं शृणु चार्वङ्गि ! चतुर्वर्गप्रदायकम् । शरच्चन्द्र प्रतीकाशं पञ्चदेवमयं सदा" कामधेनुत० । मातृन्यासेऽस्य पृष्ठवंशे न्यस्यता । काव्यादौ प्रथमप्रयोगे वकारशब्दोक्तं फलम् ।

**व** पु० वल–ड । "वः पुमान् १वरुणे २सिन्धौ ३भगे ४तोये ५गते तु वा । ६गन्धने ७तन्तुसन्ताने पुंस्येव ८वपने स्मृतः" मेदि० । ९कुम्भे शब्दर० ।

**वंहिष्ठ** त्रि० अतिशयेन बहुः इष्ठन् बंहादेशः । अतिशय-बहुले अमरः । [बहुले स्त्रियां ङीप् ।

**वंहीयस्** त्रि० अतिशयेन बहुः ईयसु बंहादेशः । अतिशय-

**वकुर** त्रि० भास्कर+भयङ्कर+वा पृषो० । १भास्करे २भयङ्करे च ऋ० १।११७।२१ भा० ।

**वठ** वृत्तौ सामर्थ्ये च भ्वा०पर०सक०सेट् । वठति अवठीत् अवाठीत् । ववाठ वेठतुः । [अमरः ।

**वड़वा** स्त्री वलं वाति वा–क लस्य डः । १घोटक्याम्, २अश्विनीनक्षत्रे ज्यो० । ३दास्याञ्च । वड़वाकृतशब्दे दृश्यम् ।

**वड़वाकृ(हृ)त** न० वड़वया दास्या कृतः (हृतः) वा । दासभेदे "भक्तदासश्च विज्ञेयस्तथैव वड़वाकृ(हृ)तः" स्मृतिः ।

**वडवाग्नि** पु० वड़वायाः शिवक्रोधाग्नेरयामुखस्थोऽग्निः । समुद्रस्थिते घोटकीमुखस्थे कालानले । कालिकापु०४१अ० । तयोत्पत्तिरुक्ताऽस्य । और्वशब्दे १५८१।८२पृ० अन्ययोत्पत्तिरुक्ता दृश्या । वड़वानलादयोऽप्यत्र ।

**वड़वामुख** पु० वड़वाया मुखं स्थानत्वेनास्त्यस्य अर्श आदित्वादच् । समुद्रस्थे कालानले हेमच० ।

**वड़वासुत** पु० द्वि० व० ६त० । अश्विनीकुमारयोः । अश्विनीकुमारशब्दे दृश्यम् । [वैशालुः

**वण** शब्दे भ्वा०पर०सक०सेट् । वणति अवाणीत्–अवणीत्

**वण** पु० वण–अच् । शब्दे भरतः ।

**वणिक्पथ** पु० ६त० अच्समा० । हट्टे । [शब्दच०

**वणिग्बन्धु** पु० वणिजां बन्धुरिव पोषकत्वात् । नीलीवृक्षे

**वणिग्भाव** पु० ६त० । वाणिज्ये आजीवनार्थं क्रयविक्रयकरणे अमरः ।

**वणिग्वह** पु० वणिजं वहति वह–अच् । उष्ट्रे शब्दच०

**वणिज्(ज)** पु० पणायते व्यवहरति पण–इजि इजो वा पस्य वः । आजीवनार्थं क्रयविक्रयव्यवहारकर्त्तरि अमरः । २ज्योतिषोक्ते ववादितः षष्ठे करणे च ४वाणिज्ये स्त्री मेदि० । स्वार्थे अण् वाणिज तत्रार्थे अमरः ।

**वणिज्य** न० वणिजो भावः कर्म वा य । वाणिज्ये आजीवनार्थं क्रयविक्रयादिव्यवहारे भरतः स्त्रीत्वमपि । "चतुरेण चतुर्वर्गचिन्तामणिवणिज्ययेति" मुक्ताफलम् । ष्यञ् । वाणिज्य तत्रार्थे न० ।

**वद** स्थैर्ये निश्चलभवने भ्वा०पर०सक०सेट् । वदति अवादीत् अवदीत् । ववाद वेदतुः ।

**वद** भाषणे वा चु०उभ०पक्षे भ्वा०पर०सक०सेट् । वादयति ते अवीवदत्-त । पक्षे वदतीत्यादि ।

**व(व)दर** पु० वदति स्थिरीभवति छिन्नस्यापि पुनः प्ररोहेण वद+स्थैर्ये अरच् ।१कोलिवृक्षे २देवसर्षपवृक्षे राजनि० । तस्य फलम् अण् तस्य लुक् ।३कोलिफले राजनि० । कर्कन्धुशब्दे दृश्यम् ।४कार्पासफले ५कोलिफले न० ६कोलिभेदे (सेओयाकुल) कार्पासास्थि पु० मेदि० । अन्त्यस्यादित्वमस्यान्ये रूक्षम् । ८वराहक्रान्तायां १कार्पासवृक्षे स्त्री अमरः ।

**वदर(प)पाचन** न० तीर्थभेदे भा०श०४९अ० । तत्र इन्द्रोपदेशेन कुमार्य्या पञ्चवदराणां पचनात्तथात्वम् ।

**व(व)दरफली** स्त्री व(व)दरस्येव फलमस्याः ङीप् । भूमिव(व)दर्य्याम् राजनि० ।

**व(व)दरवल्ली** स्त्री व(व)दरफलप्रधाना वल्ली शा०त० । भूमिव(व)दरीतिख्याते लताभेदे राजनि० ।

**व(व)दरामलक** न० व(व)दरमिवामलकम् ।१प्राचीनामलके हारा० । समा०द्व० । २वदरामलकफलयोः समाहारे न०

**व(व)दरिकाश्रम** पु० न० । वदरी+स्वार्थे क तस्याः समीपे तच्चिह्नितोवाश्रमः । तीर्थविशेषे । व(व)दरीशैलोऽप्यत्र । भा० व० ९२ अ० दृश्यम् । बदरिकावनमध्यत्र तच्च हिमालयपर्वतैकदेशे श्रीनगराख्यदेशसमीपे अलकनन्दानदीपश्चिमभागे स्थितम् ।

**व(ब)दरी** स्त्री व(व)दर+गौरा०ङीष् । १कोलिवृक्षे अमरः २कार्पास्यां शब्दर० कपिकच्छ्वाम् राजनि० । ततः पील्वा० पाके कुणच् । वदरीकुण तत्पाके न० ।

**व(व)दरीच्छदा** स्त्री व(व)दर्य्या इव च्छदो यस्याः ।१हस्तिकोलिवृक्षे २शङ्खनख्याञ्च राजनि० ।

**ववदरीपत्र** पु० व(व)दर्य्या इव पत्रमस्याः । नखीनामगन्धद्रव्ये जटा० । स्वार्थे क । तत्रैव । [लिकायाम् शब्दमा०

**ववदरीफला** स्त्री व(व)दर्य्या इव फलमस्याः । नीलशेफा-

**वद्ध** त्रि० वन्ध–कर्मणि क्त । बन्धनकर्मणि अमरः ।